श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीतटाकपालकस्तवः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीतटाकपालकस्तवः ॥

कवितार्जितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

तटाकजीवनं गुप्तं ताटकाजीवनं हृतम्।
येन तेन मनो मेऽस्तु पावनेन परिष्कृतम्॥ 1॥

उन्नसं मुखमुदारलोचनं
कोमलाननकपोलफालकम्।
पालकस्य कमलालयस्य मे
मानसे लसतु तेजसां पदम्॥ 2॥

स्वामिन्! दक्षिणहस्ततो भुवमिमां वामेन तद्वद्दिवं
त्वं सन्दर्शयसे स्मितेन मृदुना व्याख्यां च तस्योचिताम्।
एवं मां भजतामिहैव भविता मोदः परस्मिन् पदे
यः स्यादित्यथ बाणचापधृतये तच्चेति तच्छादनम्॥ 3॥

एकैव वाणी रघुनन्दने स्यात्
एकैव युक्ताथ भवेद् द्वितीया।
एकैव कान्ता जनकात्मजा यत्
एकैव तस्मिन् शरणागतिर्नः॥ 4॥

द्वितीया यदीया विदेहात्मजाता
द्वितीया न कीर्तेस्समा यस्य भूमौ।
द्वितीयावचो यं वनं प्रापयत्तं
द्वितीयान्तमाकल्य्य भूयो नमामि॥ 5॥

तृतीयोऽनु यातस्सुतो भूपतेर्यः
तृतीयोऽचरत्स्वेन कान्तारमध्ये।
तृतीयो दशास्यात् शरण्यं यमाप
तृतीयो बलो येन रामस्तमीडे॥ 6 ॥

चतुरो दशरथनृपतिः
चतुरस्सुषुवे सुतान् गुणोदारान्।
चतुरस्ततोऽपि सोऽहं
चतुरस्तानेव सन्ततं वन्दे॥ 7 ॥

पञ्च वसंस्त्वं नव च वनेऽब्दान्
पञ्चमगायकजीवनदान !।
पञ्चशरार्बुदसुन्दर ! पायाः
पञ्चभिरानतमाकुलितं माम्॥ 8 ॥

षड्भिनरक्षितकौशिकसत्रं
षड्गुणशोभितनैजात्मानम्।
षड्पदसन्निभविग्रहवर्णं
षड्पदसन्मनुवशगं वन्दे॥ 9 ॥

सप्तवाहकुलसत्तपः फलं
सप्तसालकृतबाणविभ्रमम्।
सप्तजिह्वसखसूनुसन्नुतं
सप्तमावतरणं भजे हरेः॥ 10 ॥

अष्टाक्षरान्तर्विहृतिं वितन्वन्
अष्टाकृतेरन्तरपि स्वनाम्ना।
अष्टाक्षरैश्वर्यकरो नतानाम्
अष्टासु दिक्षु श्रुतकीर्तिरिन्धे॥ 11 ॥

नवमणिभूषणभूषितदेहः
नवरसपूरितभव्यचरित्रः।
नवतमकोमलरूपसमेतो
नवनरतो रघुनन्दनोऽस्तु मे ॥ 12 ॥

दशरथनरवरसुतमणिमीडे
दशमुखनिशिचरमारकवीरम्।
दशशतनयनजसुतकृतदौत्यं
दशशतकरभवमित्रवरेण्यम् ॥ 13 ॥

कार्मुकवरधरसुन्दरविग्रह -
सारसपालकनुतिरियमुदिता।
कार्मुकपुरभवसुन्दरभाषित -
मानिधिकविमणिवदनाज्जयति ॥ 14 ॥

॥ इति श्रीतटाकपालकस्तवः समाप्तः ॥

sunder kidāmbi
prapatti dot com
sunder kidāmbi